मावश्यकं घटोस्ति तद्व्यक्तिरस्तीत्यादिप्रत्ययानां वैलक्षण्यापातु भवेन तादृशविरोधासिद्धेः का
रत्वं च विशेष्यतया साध्यवद्वृत्तित्वानुक्तौ न कोपि दोषः घटभिन्नाविशेष्यकस्य घटमात्र रा न
विशेष्यकत्वानस्य विशेष्यतासंबंधेनाभावस्य हेतुव्यापकत्वादिति वाच्यं पमात्रविशेष्य ५६
यत्र

कं ज्ञानमत्रसिद्धं तद्भेदस्साध्यकप्रमेयत्वादावतिव्याप्तितादवस्थ्यादितिभावः येनयेनसंबंधेने
त्तत्र विशेषणताविशेषस्यापि निवेशात्ततएवातिप्रसंगादिमोंगसंबंधांतरप्रवेशो व्यर्थइत्याश
येनाह विशेषणताविशेषेणावेति नन्वेवं व्यभिचारिण्यतिव्याप्तिः विशेषणतया धूमादिम
त्ववर्त्तमानस्यायःपिंडत्वादेर्विशेषणतयाभावस्य वन्ह्यादिव्यापकत्वादत आह सर्वत्रेति व्यभि
चारिणीति शेषः तत्तद्व्यक्तित्व इति व्यभिचारनिरूपकतत्तदधिकरणव्यक्तित्व इत्यर्थः तथा च तद
भावस्यैव हेतुव्यापकत्वान्नातिव्याप्तिरिति भावः ननु तत्तद्व्यक्तित्वं तत्तदयोगोलकादिस्वरूपं त
दीपरूपादिस्वरूपं वा तस्य च विशेषणतयाभावो वन्ह्यादिव्यापक एवेत्यत आह तत्तदन्यत्वइ
तिननु तत्तदन्यान्यत्वं तत्तदयःपिंडादिस्वरूपमेवेत्युक्तदोषतादवस्थ्यमत आह तत्प्रकारकेति त
तद्व्यक्तित्वप्रकारकेत्यर्थः तादृशज्ञानविषयत्वस्य साध्यवत्स्वपि सत्त्वात्प्रमेतितत्तत्साध्यवद्वृ

ज॰ शी॰
५७
57

तित्वं नत्वसाध्यवदन्यवृत्तित्वं एवं तत्सौलभ्यादेतावत्पर्यन्तानुधावनमफलं भेदस्याप्यव्याप्यवृत्तित्वे स
वृत्त्यव्यभिचारित्वात्तत्सौलभ्यासंभवादिति भावः साध्यवद्वृत्तितत्तद्घटितत्वावच्छिन्नाभावकू
टत्वे वैशिष्ट्यगौरवादाह तेनैव संबंधेनेति तदवच्छिन्नेत्यादिविशेषणताविशेषेणैव साध्यवद्वृत्ति
त्वावच्छिन्नसामान्याभाव इत्यर्थः मिश्रमतमनुपन्यस्यति केचित्त्विति नञ्व्यासेनं साध्यपदो
त्तरनञस्तत्पूर्वप्रदेशेण ननु साध्याभिन्नस्य धूमादेः साधनसामानाधिकरण्याधिकरणत्वाद्व
न्हिमान् धूमादित्यादावव्याप्तिः प्रमेयवान्वन्हेरित्यादौ साध्याभिन्नाप्रसिद्धिश्चेत्यत आह साध्य
विरोधीनीति असुरादिपदेन ञो विरोधिबोधकतायामुत्पन्नत्वादिभावः ननु साध्यविरोधित्वं साध्या
भावव्याप्यत्वं तच्च केवलान्वयिन्यप्रसिद्धमत आह साध्यासमानाधिकरणानीति साध्यासमानाधिक राम
रणानामसामानाधिकरण्यस्यैतौ केवलान्वयिन्यव्याप्तितादवस्थ्यं तावद्वृत्तौ हिमाश्रित्य व्या ५७

म

च्छेदतानीति साध्यासमानाधिकरणानीत्यर्थः ननु साध्यासमानाधिकरणस्य जलत्वादेः साधनसमा
नाधिकरणपानधिकरणत्वात् धूमवान्वह्नेरित्यादावतिव्याप्तिरत आह साध्यसामानाधिक
रण्याभावेति वह्निसामानाधिकरण्यगगनाभावत्वावच्छिन्नाभावस्य धूमसामानाधिकरण्याभाव
व्यापकत्वादुक्तातिव्याप्तितादवस्थ्यमतः साधनसामानाधिकरण्यत्वावच्छिन्नाभावत्वेन व्यापकत्व
नाविवक्षितं तु सामान्यपदमुपात्तं साध्यवृत्तीति साध्यतावच्छेदकविशिष्टसाध्यवत्तीत्यर्थः तेन विशिष्ट
सत्तासाध्यकजातिमत्त्वादौ नातिप्रसंगः परं च हेतुनिरूपितत्वाहेतुमतीति हेतुतावच्छेदकविशिष्ट
त्वादिः तेन द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः तेनैव हेतुतावच्छेदकसंबंधेनैव साध्यतावच्छेदक
संबंधेन साध्यवत्त्वमवेश्यस्य फलमाह तेनेति हेतावित्ति नातिप्रसंग इति परेणान्वयः समवायेन
पृथिवीत्ववति कालिकेनावर्त्तमानस्य प्रलयादेः कालिकेन हेतुमति महाकालेऽवृत्तित्वविर

ज-शी· हान्नातिप्रसंगः अन्यथाप्रलयादेरपि पृथिवीत्ववन्महाकालादिवृत्तित्वात् पृथिवीत्ववद्वृत्तित्व
मद्वृत्तिगगनादेर्वेव तन्नेहेतुत्वसामानाधिकरण्यसत्वादतिव्याप्तिः स्यादेवेति भावः पूर्वदलप्र
५८ विष्टहेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तेः फलमाह द्रव्यत्वादेश्चातिद्रव्यत्ववत्समवेतस्य
58 गुणत्वादेरवहेतुसामानाधिकरण्यविरहान्नातिप्रसंगोऽन्यथावृत्तिमन्मात्रस्यैव द्रव्यत्वव
तिमहाकाले वृत्त्याद्रव्यत्ववद्वृत्तित्वमद्वृत्तिगगनादावेव स्यात्तत्र च समवेतहेतुसमानाधिकर
णमेवेत्यतिव्याप्तिरितिभावः द्रव्यत्वे साध्ये गुणत्वस्य विरुद्धतया साध्यसामानाधिकरण्य
विवक्षयापि निरासः संभवतीत्यतः सत्वपर्यन्तमनुसृतं सत्वगुणत्वोदाविव्यपि कश्चित्पाठः
त्व तत्रसत्तायां हेतुतायां हेसामानाधिकरण्यस्य साध्यसामानाधिकरण्यव्यापकत्वाभावाद्धेतुभि रा.म.
न्नेएवानुसरणीयः गुणत्वस्य हेतुतायां तु तत्रैवायं सत्तु महद्दत्वांशे पन गुणत्वस्य पश्चादुक्तिः ५८

हेतुतावच्छेदकसंबंधेनहेतुमत्त्वोक्तेःफलमाहनवासंयोगेनेति॥स्पंदत्वादेरितिवृत्तावपीयंपरेणा न

न्वयःतथाचवन्हिमान्पर्वततद्रूपादितत्रवन्हिमदसमवेतस्यकालपरिमाणादेःकालिकसंबंधे

नपर्वतीयरूपवतिकालेसमवेतत्वेपिहेतुताघटकेसमवायसंबंधेनतादृशरूपवतिपर्वतादाव

समवेतत्वान्नाव्याप्तिरितिभावः।कालस्यापिसंयोगेनवन्हिमत्त्वात्साध्यवदसमवेतत्वेनका

लपरिमाणस्यातःस्पंदत्वमनुसृतंकेचित्तुमहाकालस्यकालिकसंबंधेनरूपाद्यधिकरणत्वे

व मानाभावात्तदानीमिदानीमित्यादिप्रत्ययेनकालोपाधीनामेवतथात्वावगाहनादितिमंत

प्पव्याप्तिसंपत्तयेस्पंदत्वपर्यंतमित्यप्याहुः।तेनैवतस्यप्रयोजनमाहसमवायेनेतितेदधिक

रणाइतिवन्हिव्याप्यरूपविशेषादेरधिकरणेऽप्यभावात्तादवित्यर्थः।तच्चिंत्यमितिएतद्रूपभिन्नगुणा

त्वादित्यत्रातिव्याप्तिर्गुणत्ववदसमवेतत्वस्यैतद्रूपभिन्नासमवेतत्वव्यापकत्वादेवंवाच्यत्वसाध्य

ज-शी·
५९
59

केतादात्म्येन विषयितापायाज्ज्ञानादिहेतावव्याप्तिर्वीच्यानात्मकत्वस्य वाच्यविषयत्वादेश्चाप्र
सिद्धेः न च साध्यस्य हेतोश्च सामानाधिकरण्ये विशेषणताविशेषणभावे श्रमतानकोपि
दोष इति वाच्यं तस्य व्याप्तिग्रहोपायेऽस्वपमेव वक्ष्यमाणत्वादिति भावः यथाश्रुतमिति
अन्यथा साध्यवद्वृत्तित्वस्यैव लक्षणघटकतया साध्यानधिकरणेति त्वमादाय दोषश्च
दर्शनस्यासंगतापत्तेरिति भावः प्रतियोग्यनधिकरणहेतुमन्निष्ठत्वरूपस्य प्रतियोगिविशेषि
तस्य निरवच्छिन्नहेतुमद्वृत्तिताकत्वरूपस्य वा व्याप्यवृत्तित्वस्य प्रवेशे वक्ष्यमाणातिव्या
प्त्यसंगतेराह प्रतियोगीति तथा सतीति नास्तीत्यनुगतप्रतीतेरननुगताधिकरणव्यक्ति
भिरसंभवादेवातिरिक्तो भावः प्रसिध्यति सोपि चेदधिकरणभेदाद्भिन्नस्तदाधिकरणाव्य राम
मि क्तिरेवाभावव्यवहारोस्त्विति कृतमतिरिक्ताभावेनेति भावः ननु प्रतियोगिसामानाधिक ५९

रण्यतद्सामानाधिकरण्यव्याप्यवृत्तित्वाव्याप्यवृत्तित्वलक्षणाविरुद्धधर्माध्यास एव द्रव्यगुणवृत्ति
संयोगाभावयोर्भेदकोस्त्वत आह संयोगेति द्रव्यनिष्ठेति प्रतियोगित्वं वैशिष्ट्यव्यासज्यवृत्ति
धर्मानवच्छिन्नमात्वमतो नद्रुत्वाद्यवच्छिन्नाभावमादाय गुणेपि संयोगाभावस्याव्याप्यवृत्तित्वं
एवमुत्तरत्रापि बोध्यं अविरोधादिति संयोगाधिकरणद्रव्यवृत्तित्वतदनधिकरणगुणवृत्ति
त्वयोर्गगनादावभावे सत्वादिति भावः ननु स्वसमानाधिकरणात्यंताभावप्रतियोगित्वतदधि
करणा [illegible] वृत्तित्वयो [illegible] सामान्याभावादिलक्षणविरुद्धधर्म एव भेदको वाच्य इत्यत आह सा
व मान्यतइति न तथात्वतिरेकाद्रस्तन्वयपक्षस्याव्याप्यवृत्तित्वसामान्याभावः प्रतियोगिसामानाधि
करणपसामान्याभावः संयोगाभावेनास्त्येवको भेदकः स्यादिति इदं च सामानाधिकरण्यपस्य व्या
प्यवृत्तितामनुसृत्य अन्यथा प्रतियोगिसामानाधिकरणपतत्सामान्याभावयोर्द्रव्यगुणात्मकाव

न·श्री· छेदकभेदेन संयोगसामान्याभावेऽव्याप्तावपि सत्त्वाभावादिति ध्येयं साध्यवानिति साधनवह्निष्ठा
न्योन्याभावाप्रतियोगीति प्रकृते साध्यवतीति समस्यमानपदार्थ एवान्वयस्यौत्सर्गिकत्वादि
६० ति भावः सम्वेति तथा च साधनवह्निष्ठान्योन्याभावाप्रतियोगि साध्यवत्त्वस्याधिकरणत
त्वे वाक्यार्थः। अधिकरणत्वं च संबंधित्वं अत एव तादात्म्येन गगनादिहेतौ नाव्याप्तिः यस्य
60 साध्यवत्त्वं तु साधनवह्निष्ठान्योन्याभावाप्रतियोगि तस्यैव समन्वयेऽपि नेति: साधनसामाना म
धिकरणपरूपस्यैव पत्यदार्थसंबंधस्य साध्येऽनुप्रवेशादित्याशयेनाह साध्यसाधनयोरपीति
सामानाधिकरण्यमेवेति संबंधः इत्यनुषज्यते सिद्धिकर्मत्वादिरूपस्य साध्यत्वादेर्व्याप्त्यनिरू
प्यत्वादनुपपत्त्या व्याचष्टे साध्यत्वेति पदाभ्यामिति तथा च पदद्वित्रिष्ठान्योन्याभावाप्रतियोगी रम
पदार्थस्तेन समं तस्य सामानाधिकरण्यं व्याप्तिरिति फलितं प्रतियोगितावच्छेदकमिति भावः प्र ६०

ख्यानो निर्देशः प्रतियोगितावच्छेदकत्वमित्येव वा पाठः तेन वह्नित्वावच्छिन्नस्य वह्निमात्र
स्यैव धूमसमानाधिकरणत्वात्तद्वह्निमत्त्वावच्छिन्नभेदप्रतियोगितावच्छेदकत्वेऽपि न त्वाभिः
तादृशप्रतियोगितावच्छेदकत्वस्य वह्नित्वेनानवच्छेदात् इति ध्येयं ननु तत्तद्वह्निमत्त्वाव
च्छिन्नभेदस्यैव प्रतियोगितावच्छेदकत्वं वह्नित्वावच्छिन्नं वाच्यमित्यव्याप्तिरेव तत्राह
न चेति वह्नित्वावच्छिन्नो वह्निर्वा न वह्नित्वाच्च यावद्वह्निनिष्ठमेवाभावप्रतियोगिता
वच्छेदकत्वं वह्नित्वावच्छिन्नमित्येकवह्निनिष्ठस्य प्रतियोगितावच्छेदकत्वस्य वह्नित्वाव
च्छेदकत्वविरहान्नाव्याप्तिरत्र तत्त्वे वयुक्तिमाह धूमवान्वह्निमान्नेत्यप्रतीतेरिति केचित्तु य
द्रूपविशिष्टं तादृशप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणं तदन्यरूपावच्छिन्नसामा
नाधिकरण्यं विवक्षितमित्याहुः। ननु सामान्याभावासत्त्वेऽपि लक्षणस्य को दोष इत्यत

ज॰ शी॰ आहपरंवेतितद्वन्हिमद्देशः तत्तद्वन्हिमत्वावच्छिन्नभेदाभ्यकाधिकरणेतिन्प यावन्हैंत्वपि म
वन्हिमान्नेतिप्रतीत्यापत्तेरितिभावः तदधिकरणावृत्तित्वरूपस्यवैयधिकरण्यस्यप्रवे
६१ शेप्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेरितिमूलासंगतिर्गगनादेर्वृत्तत्वप्रसिद्धेरतोव्यावर्षवैयधिक
61 करणपमितिननुसाधनवैयधिकरण्यानधिकरणत्वप्रवेशेनैवसामंजस्येसमानाधि
करणपदंव्यर्थमतआहतच्चेतिसाधनसमानाधिकरणेऽभावेपिकेवलान्वयिसाधन
वैयधिकरण्याप्रसिद्धिरेवसाधनस्यापिस्वसमानाधिकरणाभावदूमंतर्गतत्वादेतद्दूषणांतरमाह
अतिप्रसंजकंचेतिपृथिवीत्वस्यद्रव्यत्वानधिकरणावृत्तित्वानधिकरणत्वादितिभावः
अतइतितथाचद्रव्यत्वसमानाधिकरणीभूतजलत्वाद्यनधिकरणावृत्तित्वस्यपृथि राम
वीत्वसत्वेऽनातिव्याप्तिरितिभावः अत्रचयेनयेनसंबंधेनयोयः साधनसमानाधिकरणसे ६१

न्तेन संबंधेनैव तत्तदनधिकरणे साध्यतावच्छेदकसंबंधेनैव वृत्तिमत्त्वं तादृशे वैयधिकर
ण्यार्पितं दर्शयामास्त्व ॥ तेन साधनसमानाधिकरणस्यापः पिंडत्वादेः संबंधसामान्येनानधि
करणे गगनादौ धूमादेरवृत्तित्वेपि धूमवान्वन्हेरित्यादौ नातिव्याप्तिः ॥ न वा ज्ञानवानात्म
त्वादित्यादौ साधनसमानाधिकरणस्यात्मत्वादेरनधिकरणे कालिकादिसंबंधेन सा
ध्यस्य ज्ञानादेर्वृत्तावप्यव्याप्तिः धूमादेरित्यत्र समवायेन साध्यतामभिप्रेत्य संयोगेन तथा
त्वे द्रव्यत्वानधिकरणासंयुक्तत्वाप्रसिध्या द्रव्यत्वमादायातिव्याप्त्यसंभवादिति दोषं त्वस
मवायेन धूमस्य साध्यतायां वन्ह्यादिहेतौ वैरुद्ध्यात्साध्यसामानाधिकरण्याप्रसिद्धेश्च ना
तिव्याप्तिर्येवित्वोपादानमफलमिति वाच्यं ॥ तथापि संयोगेन धूमस्य साधतायामपि स्व ।
समानाधिकरणस्य साधनाधिकरणवृत्तेरनधिकरणे महानसादौ तादृशसंयुक्तत्वप्रसिद्ध्याति

ज॰शी॰ व्याप्तिरतोयावदिति द्रव्यत्वादेरिति॥ तथाच द्रव्ये पृथिवीत्वादित्यावव्याप्तिरिति भावः॥ ननु
व ६२ तदनधिकरणमात्रवृत्तित्वमेव पक्षिकरणंपवाच्यं॥ तथाच द्रव्यत्वस्य पृथ्वीत्वाद्यनधिकरण
मात्रवृत्तित्वाभावान्नाव्याप्तिरतआह तदनधिकरणेति तथाच मात्रपदप्रवेशेपि रूप
62 वान्पृथिवीत्वादित्याद्यव्याप्तिरिति भावः तादृशेति साधनसमानाधिकरणयाव
न द्धर्मेत्यर्थः तेषां मूलस्थसाध्यातभागो रूपवान्पृथिवीत्वादित्याद्यव्याप्तिस्तु दूर
तिन हीति धूमवान्वह्नेरित्यादावतिव्याप्तिं निरस्यति धूमत्वादिकंचेति नन्ववच्छेदकत्व
मत्र न स्वरूपसंबंधविशेषो मानाभावादुक्तधर्मे तदभावे न प्रमेयधूमत्वादिना साध्यता
याव्यभिचारिण्यतिव्याप्तिश्च नाप्यन्यूनवृत्तित्वं प्रमेयवान्धूमादित्यादावव्याप्तेः पर्वतत्वा राम
द्यनधिकरणमात्रवृत्तित्वान्न्यूनवृत्तित्वात्प्रमेयत्वस्य तन्नेत्याह तदवच्छेदकत्व ६२

मितितदन्यतिरिक्ते तितादृशधर्मानधिकरणमात्रवृत्तित्वशून्यावृत्तित्वमित्यर्थः तादृशवृ ८
त्तिताशून्यवृत्तित्वे च साध्यतावच्छेदकता घटकसंबंधेन ग्राह्यं तेन वन्हिसमानाधि
करणायः पिंडत्वाधनधिकरणमात्रवृत्तित्वशून्ये ऽयः पिंडीयवन्ह्यादौ धूमत्वा
देः कालिकसंबंधेन वृत्तावपि न तादृशावच्छेदकत्वहानिः तद्भिन्नेत्यस्यार्थः तच्छून्येति ता ति
दनधिकरणमात्रवृत्तित्वशून्येत्यर्थः तेन धर्मपदस्य वैशेन नातिव्याप्तिरिति तादृशवृत्ति
ताशून्यो यः सत्तादिरूपो धर्मस्तदवृत्तितामादायैव द्रव्यत्वस्यावच्छेदकत्वसंभ
वादित्याशयः न च गगनादेरपि । कालिकादिसंबंधेन वृत्तिमत्वादुक्तदोषतादवस्थ्यं
सत्तंघसामान्येनैव तेषामवृत्तित्वोपगमान्न वस्तुतः साध्यतावच्छेदकसंबंधेन संबंधित्वरू
पमेवात्र धर्मत्वं वाच्यं अन्यथा तादात्म्येन गगनसाध्यके शब्दवत्वादावव्याप्तेस्साध

ज.शी. नसमानाधिकरणद्रव्यत्वाद्यनधिकरणमात्रवृत्तिताशून्यवृत्तिमत्त्विघयंदो गगनत्वस्यावृत्तित्वा
त्तथाचगगनेदेः कालिकतादात्म्यादिसंबंधेनधर्मत्वेपिसमवायसंबंधेनतथाविरहाद्द्रव्यसाध्यक
६२ मेयत्वादिहेतौनोक्तातिप्रसंगः यद्यप्येवंसंयोगेनद्रव्यसाध्यकेसत्त्वादावतिव्याप्तिः साधनस
63 मानाधिकरणगुणत्वाद्यनधिकरणमात्रसंयुक्तत्वशून्यगगनहवृत्तिदंडादौवर्तमानतयाद्रव्यत्वस्यनि
रूपितावच्छेदकत्वाभावात् गुणत्वाद्यनधिकरणमात्रसंयुक्तताशून्यस्यसंयोगेनवृत्तिमतोऽप्रसि
द्ध्यासाधनसमानाधिकरणगुणत्वादिकमुपादायतद्धारणासंभवात् तथापिताद्दशधर्मा
त्र नधिकरणमात्रवृत्तिताशून्यत्वनिरूपितवृत्तिमत्त्वोभयाभाववत्त्वाश्रयसामान्यकत्वेविवक्षित
द्र मित्यदोषः व्यत्वावच्छेदेनैवगुणत्वानधिकरणमात्रसंयुक्तताशून्यत्वसंयुक्तत्वोभयाभावव एम
त्वेनद्रव्यत्वस्यनिरूपितावच्छेदकत्वादितिभावः ननुसाधनसमानाधिकरणगुणत्वाद्यनधिकरण ६३

मात्रवृत्तित्वशून्येसत्वादौद्रव्यत्वसत्वोभयत्वादेःसाध्यतावछेदकसंवृत्तित्वात्द्रव्यत्वसत्वोभयवान्
जातेरित्यादावतिव्याप्तिरतआहवस्तुतस्त्वितितादृशेतिसाधनसमानाधिकरणधर्माधिकरण
वृत्तीत्यर्थःपूर्वकल्पेविशिष्टाभावघटकतयासार्थकत्वेप्यत्रकल्पेतादृशधर्मानधिकरणवृत्ति
त्वांशस्यप्रवेशवैयर्थ्यान्निवेशप्रमेयत्वादेरित्यग्रिममूलासंगतिःप्रमेयत्वाद्यधिकरणावृत्तित्वस्य
स्वतेद्व्यधिकरणस्यगगनादेरप्रसिद्धेरितिवाच्यं॰तद्धर्मस्यैवव्यधिकरणाभावछेदकत्वप्रसिद्धिप
रत्वादितिभावः॰अत्रस्वावच्छिन्नाधिकरणत्वंसाध्यताघटकसंबंधेनग्राह्यंतेनसमवायावच्छि
न्नवन्त्यधिकरणतायाःसाधनसमानाधिकरणपर्वतत्वाद्यनधिकरणमात्रवृत्तित्वेपिनवह्नि
मान्धूमादित्यादावव्याप्तिःस्वरूपसंबंधात्मकस्याधिकरणत्वस्याधिकरणभेदान्नदोषएवमे
साध्यताघटकसंबंधेनस्वावच्छिन्नाधिकरणत्वसामान्येनिवेशनीयेतेनमहानसनिष्ठाभाव

न॰शी॰ न्धितावच्छिन्नाधिकरणतावृत्तेः पर्वतत्वाद्यनधिकरणमात्रवृत्तित्वेपि नोक्तदोषः नं चैवं घटवान्म
६४ हाकालत्वादित्यादावव्याप्तिः कालिकसंबंधेन साध्यतायां महाकालान्यत्वविशिष्टघटत्वादेः
64 कथंचिदवच्छेदकत्वसंभवेपि महाकालनिरूपितविशेषणतया साध्यतायां कुत्राप्यवच्छे
दकत्वाप्रसिद्धेरितिवाच्यं तादृशधर्मानधिकरणमात्रवृत्त्यधिकरणत्वसामान्याभिन्नयत्सा
ध्यतावच्छेदकसंबंधावच्छिन्नप्रकृतसाध्याधिकरणत्वं तत्सामानाधिकरण्यं व्याप्तिरित्यत्र
वर्त्तुलार्थतात्पर्यादिति ध्येयं ननु गुणत्वाद्यनधिकरणमात्रवृत्तिताशून्यसत्वादौ द्रव्यत्वस
त्वोभयत्वादेः साध्यतावच्छेदकत्वघटकपर्याप्तिसंबंधेनावृत्तेस्तस्यावच्छेदकत्वमेव तत्त
त्त्वाहगुणान्यत्वे तिनन्वितयोर्द्व्यतिरेकित्वभेदप्रतियोगितावच्छेदकत्वं तत्त्वधर्मानाधिकरणत्व एम
तिताघटकसंबंधेनगगनाभावसंयोगाभावादेर्दुर्दासः ननु पर्वद्धूमौ तावमितत्समु ६४

दाद्यधिकरणाप्रसिध्याप्राप्तिस्विकरूपेणात्तद्धर्मवैयधिकरण्येनाव्यंतथाचयेषांवैयधिकरण्येप्र
सिध्वंसाधनसमानाधिकरणतत्तद्धर्माणामेवविशिष्यप्रवेशात्सर्वसामंजस्यंव्यतिरेकित्वनि
वेशेपिव्यर्थत्वात्तादृशयावदवच्छेदकभेदज्ञापकतयैवमूलोक्तयावत्पदस्यसार्थकत्वसंभवादन्य
थाव्यतिरेकिणोपिहेतुसमानाधिकरणयावद्धर्मान्तर्गतिस्याद्व्यत्वादेरनधिकरणसंयोगेनवृत्य
प्रसिध्यावन्हिमान्धूमादित्यादावव्याप्त्यापत्तेरित्यतस्तथैवाहवस्तुतइतितादृशस्येतिसाधन
समानाधिकरणस्येत्यर्थः तथाचेत्यादिसाधनसमानाधिकरणतत्तद्धर्मानधिकरणमात्र
वृत्तिसाध्यावच्छिन्नाधिकरणताकंयद्यदित्यर्थः यद्यपितादृशधर्मानधिकरणमात्रवृत्त्यधि
करणतावच्छेदकतावच्छिन्नभेदोक्तावपिनक्षतिः तथापियावत्पदसार्थक्यायभेदकूटोक्ति
स्तन्निरुक्तधर्मत्वादिधर्मपदंसाध्यतावच्छेदकधर्मपरंतत्तुतादृशपर्वतत्वाद्यनधिकरणमात्रवृ

ज-शी त्तित्वावच्छिन्नाधिकरणताकं महानसीयवह्नित्वमपि तन्निष्ठत्वं च न वह्नित्वेऽस्य व्याप्तिरत आह
६५ पावत्ताहश इति साधनसमानाधिकरणतत्तद्धर्मानधिकरणमात्रवृत्त्यधिकरणतानिरूपकता
65 वच्छेदकताकूटशून्येत्यर्थः तथा च महानसीयवह्नित्वनिष्ठपर्याप्त्यवृत्त्यवच्छेदकत्वेऽपि शू
न्यत्वं शुद्धवह्नित्वेऽस्त्येवेत्यदोषः नन्वेवं यावत्तादृशधर्मानधिकरणमात्रवृत्त्यधिकरणतावच्छेदक
तानितत्वस्यैकावच्छिन्नभेदो यथा पूर्वकल्पोऽपि सम्यक् विशिष्टपर्याप्त्ययदवच्छेदकत्वं तदवच्छि
न्नभेदस्य शुद्धवह्नित्वे सत्वादिति वाच्यं तादृशावच्छेदकत्वावच्छिन्नभेदस्य वक्ष्यमाणेतरावच्छेदका
व्याप्तिघटितमूर्तिकतया गौरवेण तस्यानुक्तत्वादिति भावः मूलोक्तपारिभाषिकत्वेनान्यताभावयोः संग
मार्थमाह तथा चेति दुष्ट्यं च साधनसमानाधिकरणधर्मीत्वेन वह्नेरेवाभिप्रेत इति ध्येयं एतेनेति वि राम
विभिन्नसंबंधेन वैयधिकरण्यमादायदोषेणेत्यर्थः दोषमेवाह समवायेनेत्यादिना वन्हावि ६५

तियथाश्रुतंमूलमभिप्रेत्यनिरुक्तलक्षणाभिप्राये तु वन्ह्याद्यधिकरणतायामिति ध्येयं तादृशे
ति साधनसमानाधिकरणीभूतं यन्महानसत्वादिकं तदधिकरणवृत्तित्वरूपंवैयधिकरण्य
त्वादित्यर्थः संबंधविशेषेणेति प्रथमकल्पे येन संबंधेन धर्मस्य साधनसमानाधिकरणत्वं
तेनैव यत्तदनधिकरणतन्मात्रवृत्तित्वस्य द्वितीयकल्पे च साध्यतावच्छेदकसंबंधेन स्वरूपसंबंधे
न वा तदधिकरणवृत्तित्वस्य विवक्षणान संबंधभेदनिबंधनो दोष इत्यर्थः आत्माश्रयेति साध्य
स्य व्यापकस्य व्यभिचारसंबंधेनाभावरूपायामनोपाधिकत्वव्याप्तौ साधननिष्ठप्रकृतसाध्यव्या
सम. प्तेरपि साध्यव्याप्यत्वांशप्रवेशादिति भावः। आत्माश्रयादिग्रस्तमिति साध्यस्यापि साध्यनि
ष्ठव्याप्तिनिरूपकत्वेन साध्यनिष्ठायामेव साध्यव्याप्यव्याप्तौ तादृशव्यापकत्वप्रवेशादात्माश्रयादो क
षः नतु द्रव्यं सत्वादित्यत्रानोपाधिकत्वलक्षणातिव्याप्तिस्तन्न संयोगादेरव्याप्यत्वेति तस्यासंख्या

अ.शी परिमाणादेश्चालिनीन्यायेन साध्यवन्निष्ठाभावप्रतियोगितयोपाधित्वाभावादतस्त्राह यत्ते
त्यादि यत्साधकाकेत्यर्थः पक्षाधिकरणोव्यभिचारः तन्निष्ठत्वादेरेवाखंडस्य सर्वत्र सौलभ्यादंत
६६ तद्व्युत्क्रमं तद्भिन्नत्वेति साध्यवद्भिन्नत्वप्रकारकेत्यर्थः तद्भवप्रकारकप्रमाविशेष्यत्वस्य
ना विशेष्यभेदेन नानात्वादखंडत्वासंभव इत्यतो भाव इत्युपगमात्तु स्मरणाविशेष्यवन्निष्ठस्य वि
66 शिष्टाभावस्य विशेषणाभावपर्यवसायिनः प्रतियोगित्वं विशेषणस्यैव न तु विशेष्य इति प्रा
चीनप्रवादमनुरुध्येत्यदि चेत्युक्तं तस्यापि न खंडस्यापि तत्र साध्यवति साध्यसमानाधिकर
णत्यादि। यद्यपि प्रतियोगितादृशवैशिष्ट्यस्यासत्त्ववृत्तिधर्मानवच्छिन्नत्वमात्रमित्येतावतै
वमूलं समंजसं तथाप्याहुर्धनत्वादिरूपेणोपाधिव्यवहारं समर्थयितुमवच्छेदकपर्यंतमनुसर रा.म
णासहानवस्थाननियम इत्यर्वाचीनोपाधिकत्वरूपनियमस्य प्रकृतसाध्यीयत्वाभावादात्मा ६६

अतासंभवादाह अनवस्थामिति एकेति तत्तदभाववत्त्वानवच्छेदकीभूततत्तद्देशकालानवच्छि
न्नयत्तत्तदभावाधिकरणवृत्तित्वं तच्छून्यत्वमर्थः तेन गोत्वाद्यभावस्याव्याप्यवृत्तेर्देशानवच्छिन्नवृ
त्तिकत्वेपि न तत्प्रतियोगितायामव्याप्तिः तदनवच्छेदकत्वं चेहावच्छेदकतासंबंधेन तत्तदभाववत्त्व
मितिन कश्चिद्दोषः तेनेति संयोगाद्यभावस्यैकदेशावच्छेदेन घटादिप्रागभावस्यैकैककालावच्छे
देन प्रतियोगितासंदेहाभावादिति भावः। अभावविरोधित्वं नाभावविरहव्याप्यत्वं येनानवस्थास्या
त् किं त्वभाववदवृत्तित्वमेव तथा चाव्यमित्याशयेन स्वपभेदप्रतियोगिनि तदव्याप्तिमुद्धर्तुमाहस्व
त्वेति यथाश्रुते तु मूलाभिप्रेतस्यानिपमघटितप्रतियोगित्वस्याव्याप्तेरुक्तग्रंथे नानुद्धारात्तद्विरोध
श्चिंतनीयः वक्ष्यंति अन्यथात्यंताभावप्रतियोगिन्यप्यव्याप्तिसंभवे न्योन्याभावमात्रप्रतियोगि
त्वव्याप्त्यभिधानं मूलकृतो विरुद्धमिति भावः इत्थं संबंधविशेषस्य निवेशे तद्वत्तिसमवायेन सत्वा

ज-शी. भाववति तादृशेति प्रतियोगितावच्छेदकसंबंधेन यत्प्रतियोगिसंबंधितद्वृत्त्यभाववत्त्वमित्यर्थः
अत्र वृत्तित्वं तादृशप्रतियोगिमत्ताबुद्धिविरोधिताघटकसंबंधेन ग्राह्यं तेन सत्त्ववति महाका
६७ लादौ तद्विरहस्य कालिकादिसंबंधेन वृत्तावपि नाव्याप्तिः नचैवं सत्तारूपस्य सदन्यत्वाभावस्य
६७ प्रतियोगिन्यव्याप्तिः सदन्यत्ववति ज्ञात्वादौ तद्विरोधितावच्छेदकेन समवायेन वृत्तेरप्रसिद्धेरिति वा
वाच्यं स्वसंबंधाधिकरणावृत्त्यभावाधिकरणतासामान्यकत्वस्योक्तत्वात् अभावमात्रस्ये
वाभावभिन्नत्वोपगमाद्दैशिकस्वरूपसंबंधेनावृत्तित्वं वाच्यं इति तु भ्रमः गगनाभावस्य कालि
कसंबंधेन यो विरहस्तदभावप्रतियोगिन्यव्याप्तेस्तादृशविरहाभावस्य गगनाभावात्मकस्य ताद
शविरहात्मकप्रतियोगिमति नित्यद्रव्यादौ स्वरूपसंबंधेन वृत्तेरिति ध्येयं व्यधिकरणेति संयोगेन एम
रूपाद्यभावस्य तत्संयोगेन रूपादिसंबंधत्वाधिकरणाप्रसिद्धेरिति भावः सिद्धांते तु यत्प्रतियोगिता ६७

वच्छेदकसंबंधसामान्योपदीयत्वयदभावाधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वोभयाभा
वस्तेन संबंधेन तत्स्य तदभावप्रतियोगित्वमिति क्रमेणास्यार्थः तत्परिहारइति संयोगसामान्य
स्वरूपीयत्वतादृशरूपाभावाधिकरणानुयोगिकत्वोभयाभावसत्त्वाद्व्यधिकरणसंबंधेनाभा
वस्य प्रतियोगितापानाव्याप्तिरित्यर्थः यथाश्रुते घटत्वादेरपि द्रव्यत्वाद्यभावप्रतियोगित्वाप
त्तिः स्वीयपदभावाधिकरणानुयोगिकत्वेतु तौ च स्वप्रतियोगिकत्वपर्यवसायिनः स्वी
यत्वस्य विनातिरिक्तस्वप्रतियोगितादुर्वचत्वमित्याहि केचिदसमवान्निदैशिकत्वासंभवादाह
त्रपीतिनचेतिवाच्यमितिपरेणान्वयः घटादिभेदस्य प्रतियोगित्वव्याप्तिस्य भेदविरहत्वाभा स्त
वादेवं तत्प्रतियोगितावच्छेदकघटत्वादावतिव्याप्तिस्तस्य घटादिभेदविरहस्वरूपत्वादित्यर्थः
ननुप्रकृतानौपाधिकत्वरूपव्याप्तिनिविष्टस्यैव प्रतियोगित्वस्य निर्वचनादन्योन्याभावप्रति

ज-शी योगित्यव्याप्यादिकं न ज्ञातिकरं साध्यवन्निष्ठात्यंताभावविरहान्यत्वे सति साधनवन्निष्ठात्यं
६८ ताभावविरहात्मकस्योपाधेर्यत्रैव विरहस्तत्रैवानौपाधिकत्वव्याप्तेः पर्यवसानादित्यत आह
प्रकृतेति लक्षणेति मूलोक्तोपाधिलक्षणे वैयर्थ्यमिति साध्यवन्निष्ठोऽभावस्तद्विरहान्यत्वेनैव ति
68 मवान्वन्हेरितादावार्द्रेन्धनादेरुपाधितया व्याप्तिलक्षणगतेति व्याप्तित्वदासादिति भावः ननु
आर्द्रेन्धनादेर्धूमसमानाधिकरणस्वध्वंसादिविरहस्वरूपतेन दन्यत्वाभावादनुपाधित्वं स्या या
सं दतो ध्वंसप्रागभाववारकतत्पर्यवसितपदं सार्थकं स्यादत आह सर्वत्रैवेति नित्यस्येति व्यभिचारस्था
नान्यत्वस्वरूपस्यायःपिंडभेदादेरित्यर्थः नित्यस्यापि साध्यवन्निष्ठस्य स्वीयविशिष्टाभावा
देर्विरहस्वरूपतयानुपाधित्वापत्तिरतोऽत्रावच्छेदकत्वप्रवेशोऽप्यजन्यस्यार्द्रेन्धनादेस्त राम
सोधारणरूपेणोपाधित्वं संभवतीत्याह नित्यस्याधारणेति तथा च साध्यवन्निष्ठाभावविरहे ६८

रूढत्वानवच्छेदकीभूतसाधननिष्ठाभावविरहत्वावच्छेदकधर्मवत्त्वमेवोपाधित्वं इति न साध्यापः
पिंडभेदार्द्रेंधनान्यतरत्वादिनार्द्रेंधनस्याप्युपाधित्वंसुवचमितिभावः इतरथेतिपक्षद्रूपेणो
पाधित्वाव्यवहारस्तद्रूपावच्छिन्नप्रतियोगित्वस्याल्लत्वइत्यर्थः भेदेतित्तथाचापः पिंडभेद
त्वादेः साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वात्ताद्रूप्येणोपाधिव्यवहारोनुस्यादतोसंतपे
दमुपाधिलक्षणसार्थकं स्यादितिभावः मोचस्तु इतरथा भेदसाधारणप्रतियोगितामात्रस्य
लक्ष्यत्वे तथा च पः पिंडभेदत्वादेः साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वादपः पिंडान्य
त्वादिकमुपाधिर्नस्यादतस्तत्संग्रहार्थंभेदप्रतियोगितावारकमत्यंतपदंसार्थकमित्याहुः
तच्चिंत्यं अपःपिंडभेदत्वादिरूपेणोपाधित्वाभावेपि व्यभिचारनिरूपकाधिकरणीभूतापः
पिंडभिन्नत्वरूपेणोपार्द्रेंधनादेरपःपिंडभेदादेश्चोपाधित्वसंभवान्नहिधूमवत्पयःपिंडभे

न२

न·शी दत्तावच्छिन्नस्यभेदसत्वेप्यपः पिंडभिन्नत्वावच्छिन्नस्यभेदसंभवः धूमवन्मात्रस्यैवापः पिंडभि
६९ न्नत्वात्तैच घटाभावान्योन्याभाव्यत्वादित्यादेः व्यभिचारस्थानस्य घटाभावस्यपदत्यत्वेतदवच्छि
69 न्नभेदोपिघटाभावान्यत्वस्यसाध्यसमानाधिकरणस्ताहशभेदस्यचघटाभावस्वरूपत्वा
दतस्तत्रैवव्यभिचारस्थेनान्यत्वप्रकारेणोपाधित्वासंभवइतिवाच्यंघटाभावत्वस्यैवघ
टाभावान्यत्वावच्छिन्नभेदस्वरूपत्वात्तस्यचघटाभावान्यत्वरूपसाध्यासमानाधिकरण
त्वादन्यथाघटाभावस्यतथात्वेनिर्घटेभूतलादावप्यपरेणेनघटाभावान्यइतिप्रतीति
प्रसंगात्रितिकृतज्ज्ञानेतिभ्रमाभावज्ञानविरोधिज्ञानप्रकारधर्मकत्वादित्यर्थः भेदप्रतियोगि
त्वव्याप्तिमुद्रतिवक्ष्यातिहीनिकारणीभूताभावप्रतियोगित्वलक्षणप्रतिबंधकत्वस्य राम
प्रतियोगिताघटितत्वेनात्माश्रयापत्तेराहप्रतिबंधकत्वंचेतितथाचतत्तदभावगोचरज्ञानेन ६९

संहैककालावच्छेदेनैकत्रावर्त्तमानस्यज्ञानस्यैतेनसंबंधेनप्रकारत्वंतत्संबंधावच्छिन्नतत्तद
भावप्रतियोगित्वमितिसमुदितार्थः यत्रवस्तुविशेषतदभावयोरेकेनैवपुंसावेदनंतत्रा
भावज्ञानेनसंहैकत्रावर्त्तमानस्यप्रतियोगिज्ञानस्याप्रसिध्याऽव्याप्तिरतउक्तमेकका
लावच्छेदेनेति प्रतियोगिज्ञानमात्रस्यैवपरमेश्वरीयाभावज्ञानेनसंहैककालावच्छेद
त नवर्त्तमानत्वादसंभवः स्यादेकत्रेत्युक्तं ननुभेदतुल्ये प्रतियोगितावच्छेदकवत्ताज्ञा
नस्यप्रतिबंधकत्वात्तदवच्छेदकेऽतिव्याप्तिः एवंवन्ह्यादिव्याप्यवत्ताज्ञानस्यवन्ह्याद्यभा न
वबुद्धिविरोधित्वात्तद्विषयेपीत्यतआह अभावपदस्येति घटादिभेदश्च नघटत्वादे
रभावइतिनातिप्रसंगः इतिभावः प्रतियोगितामात्रस्यलक्ष्यत्वेप्युक्तपदं नदेयमेवसं
सर्गविशेषस्यनिवेशप्रयोयेतत एवमेदप्रतियोगितावारणादित्याशयेनाह वस्तुतस्त्वि

ज॰शी॰ ति॰ एकसंबंधेति॰ तथा च साध्यवह्निष्ठात्यंताभावप्रतियोगितासामान्यानवछेदकघटितोपा
७० धिर्धूमवान्वह्नेरित्यादिव्यभिचारिण्यपि तुर्घटत्वस्यापःपिंडभेदत्वादेरपि धूमवह्निष्ठसंयो
70 गादिसंबंधावछिन्नाभावप्रतियोगितावछेदकत्वात् न च भेदत्वस्यैव लघोः संयोगादिसंबंधा
वछिन्नाभावप्रतियोगितावछेदकत्वात् तत्र अपःपिंडभेदत्वस्य गुरोरनवछेदकत्वमेवेति वाच्यं
अयोगोलकनिरूपितस्वरूपसंबंधेनापःपिंडभेदत्वावछिन्नात्यंताभावस्य धूमवत्यवश्यं वा
च्यत्वात् नहि तादृशसंबंधावछिन्नाभावस्यापि प्रतियोगितावछेदकं भेदत्वमात्रं शक्यते
वक्तुं तादृशसंबंधेन भेदत्वावछिन्नस्यापःपिंडे सत्वात्तत्तादृशसंबंधेनापःपिंडभेदाना
वस्यानुपपत्तेरिति भावः तत्संबंधावछिन्नेति अन्यथा वह्निमान्धूमादित्यादौ समवाये राम
न साध्यव्यापकस्य द्रव्यत्वादेः संयोगेन साधनाव्यापकत्वात्तस्योपाधिताप्तेरिति भावः त ७०

तदुभाभिन्नत्वं सदातनसंसर्गाभावत्वरूपस्यात्यंताभावत्वस्य सदातनत्वांशेऽत्यंताभावं निवे
श्यापृतामपि तास्य एव निष्प्रयोजनत्वादित्याशयेनाह संसर्गाभावत्वमित्यादि प्रतियोगि
तयारेक संबंधावच्छिन्नत्वलाभार्थमेवास्येतपदेमौलमितितु वस्तुगतिसूचेति अस्वरस
ना श्चेतत्यर्थः। भावाभावादित्यादिभिः पंचाम्यंतेरत्र यः व्यधिकरणेति अभावज्ञानासमानकाली
नप्रतियोगिमत्वप्रमामादायैव समानाधिकरणसंबंधावच्छिन्नाभावस्य लक्षणसमन्व
त याद्यधिकरणे तु कोननु तत्संबंधावच्छिन्नस्वाभावज्ञानेन सहैककालावच्छेदेकज्ञानावतमा नै
नस्तानविषयत्वमात्रे विवक्षितं तच्चस्वाभावज्ञानासमानकालीनापयाक्षं थंचित्प्रतियोगिपु
पस्थितिमादायैव व्यधिकरणसंबंधावच्छिन्नाभावप्रतियोगिन्यपि स्थास्यतीत्यतआह स्वाभा
वेति विशिष्टधीजनकत्वादिगर्भस्य संबंधत्वस्य प्रवेशे गौरवादाह स्वाभावज्ञानेतिन नूक्तं निरू

ग-शी क्तावेतयोरप्रवेशाद्दोषः एवं नूतनतिकरं अन्यथा घटत्वापेक्षया गुरुत्वेन कंबुग्रीवादिमत्त्वमपि लक्ष
७१ णं न स्यादत आह स्वाभाववत्त्वादीति स्वाभाववत्त्वाद्यंश इत्यर्थः यत्तु लाघवात्तदेव तर्हि प्रति
योगित्वमस्तु इत्येतस्तत्रापि दूषणमाह स्वाभाववत्त्वादावितीन तु इत्थं तथा सत्युक्तदोषस्याव
७। मूलोक्तलक्षणस्य निरस्तत्वेऽभावत्वप्रतिबंधकत्वपोश्चेत्यादिनाऽग्रे पुनस्तत्र दोषोद्भा
वनस्य संदर्भविरोधापत्तेः तथात्वे प्रतियोगित्वं ननूक्तनिरुक्तावेशांतरे स्वरूपसंबंधरूप
प्रतियोगित्वस्यानिवेशात्स्वाभाववत्त्वादावित्यादिपदमसंगतमत आह अभावत्वेतिपदधर्मा म
वत्त्वेन भावत्वावच्छिन्नप्रतियोगिताको भेदः किंतु भावाभावसाधारणः स्वरूपसंबंधविशेष
स्तदाप्याह प्रतिबंधकत्वेति एकदेशान्वयवर्तमानत्वत्वावच्छिन्नप्रतियोगिताकाभाव राम
रूपस्य प्रतिबंधकत्वस्य घटकीभूतप्रतियोगितायाः स्वरूपसंबंधताध्रौव्यसर्वत्रैवता ७१

दृशप्रतियोगित्वौचित्यादितिभावः ननु स्वीयपत्तया व्यवह्रियमाणात् तदभावकत्वमेव तत्तद
भावप्रतियोगित्वं वाच्यमतस्तत्र प्रतिबंधकत्वाप्रवेशान्नोक्तदोष इत्यत आह तथावि
धेति स्वीयत्वस्य स्वप्रतियोगितानतिरेकात्तत्र विप्रतियोगित्वानुयोगित्वघटितत्वेन
न्न तद्दोषतादवस्थ्यमिति भावः पदमिंसाध्यस्यैतत्प्रघटितत्वमित्यनेनापि साध्यस्यैवैतदुपन्न
हेत्वधिकरणत्वादित्युक्तदोषतादवस्थ्यमतोऽन्यथाव्याचष्टे यत्समानेति यस्य साध्यं य
त्साध्यमिति व्युत्पत्तितथालाभादितिभावः नोक्तदोष साध्याधेरपि तथात्वादिति मू
लोक्तदोषोनेत्यर्थः प्रतियोगित्वयोः साधनवन्निष्ठाभावस्य साध्यवन्निष्ठाभावस्य च प्र
तियोगित्वयोरित्यर्थः एकेति रूपं गुणत्वादिसत्तातिव्याप्तिः साधनवन्निष्ठाभावीयसंयो
गसंबंधावच्छिन्नप्रतियोगितावच्छेदकानां यावतामेवरूपत्वरूप साध्यवन्निष्ठाभावी

ज.श्री. पसंयोगलक्षणैकसंबंधावच्छिन्नप्रतियोगितावच्छेदकत्वात् साध्यवन्निष्ठाभावप्रतियो
७२ गित्वं पक्षसंबंधावच्छिन्नसाध्यवन्निष्ठाभावप्रतियोगित्वमपि तत्तत्संबंधावच्छिन्नं ग्रात्वमिसु
72 कौ वानुगमो गौरवं चेन्मतः आह विशेषणेति विशेषः कालिकादिव्यावृत्तः तेन नित्यरूपं
नित्यगुणत्वादित्यादौ कालिकविशेषणतावच्छिन्नप्रतियोगितामादाय नातिव्याप्तिः प्र
यमनिरुक्तेः संबंधविवक्षापाः फलमाह तेनेति प्रतियोगितावच्छेदकमात्रस्येति तथा
च धूमवान् वह्नेरित्यादावतिव्याप्तिः अपः पिंडभेदत्वादेरप्यपः पिंडनिरूपितस्वरूपसंबंधावच्छि
न्नायाः साध्यवन्निष्ठाभावप्रतियोगितायाः अवच्छेदकत्वादिति भावः नन्वेवमपि तत्रातिव्याप्ति
र्विषयितासंबंधेनापः पिंडभेदत्ववतो ज्ञानादेः स्वरूपसंबंधेनाभाववस्य धूमवतिसत्त्वादपः पिंड राम
भेदत्वादेरपि साध्यवन्निष्ठविशेषणतासंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकत्वादिति ७२

वाच्यं स्वरूपसंबंधेन ज्ञानाभावस्य केवलान्वयितया तत्प्रतियोगितायां भेदत्वादिनैव विषयित
यावच्छेदादयः पिंडभेदत्वादिस्तदपेक्षयाऽगुरुत्वादिति भावः यत्समानाधिकरणाभावप्रति
योगित्वे यावत्साध्यसमानाधिकरणाभावप्रतियोगितात्मकं तत्त्वं व्याप्तिः अवच्छेदकत्वा
प्रवेशेन लाघवादिति तु न व्याः द्वितीयनिरुक्तेः संबंधविकल्पायाः फलमाह एकेति सामा
न्यतः साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वोक्तौ धूमेयावान् वन्हेरित्यादावतिव्याप्तिः
गुरुधर्माणामेव तादृशानवच्छेदकत्वादतो यत्किंचित्संबंधावच्छिन्नायाः साध्यवन्निष्ठाभाव
प्रतियोगितायाः अवच्छेदकत्वं निवेश्यं तथा च वन्हिमान् धूमादित्यादावव्याप्तिरित्यर्थः लक्ष
णाद्वयस्यैवेति व्याप्तिमुद्धरति यथेति वाऽरस्यमिति न तु नेत्यमते गुरुधर्मस्याप्यवच्छेदकत्वाउक्त
लक्षणाद्वयमेव धूमवान् वन्हेरित्यत्रातिव्याप्तं विषयितयाऽत्रयोगोलकभेदस्यावच्छिन्नज्ञाना

म-श्री- देःस्वरूपसंबंधेनाभावस्यघटसवतिसत्वात्भेदत्वस्यैवाभोऽगोलकभेदत्वादेरपिसाध्यवन्निष्ठा
७३ भावप्रतियोगितावच्छेदकत्वात् प्रतियोगितावच्छेदकत्वपारंपर्यकसंबंधावच्छिन्नत्वप्रवेशेचाति
गौरवादतः प्रतियोगित्वपारेकसंबंधावच्छिन्नत्वाप्रवेशेन लघुतरंकल्पांतरमाह वस्तुतस्त्व
73 तिनचतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकत्वमेवान्योन्याभावत्वमित्यत्रापिप्रतियोगिता
पासंबंधविशेषावच्छिन्नत्वंनिविष्टमेवेतिवाच्यं नव्यमतेभेदत्वस्याखंडोपाधित्वात् अवच्छे
दकत्वपारेकसंबंधावच्छिन्नत्वंपुनरन्यापिदेयमेवतेनसाधनाविच्छिन्नभेदप्रतियोगिताव
च्छेदकस्यापोगोलकान्यत्वादेः साध्यवन्निष्ठस्यस्वविषयकज्ञानभेदस्यप्रतियोगितावच्छेद
म कत्वेपिधूमवान्वन्हेरित्यादौनातिव्याप्तिरितिध्येयं वस्तुतोऽत्यंताभावगर्भव्यापकत्वस्यप्रवे राम
शेसाधनाव्यापकोपावद्व्यापकंपसेत्यादिमूलेव्यापकादिपदस्यव्यापकतावच्छेदकादौ ७३

लक्षणस्यादन्योन्याभावगर्भव्यापकत्वस्यप्रवेशेतुनैवमित्याशयेनैवव्यस्तानइत्याकक्तेइति
युक्तमुत्पश्यामः साध्याभिन्नंयावदित्यभेदगर्भमितिशंकितुमाह यावतामिति तदेवाव्यभि
चारिपस्येत्यर्थे वन्हिमान् धूमादित्यादावव्याप्तिर्मा वदे तन्मतिस्पद्व्यत्वादेः साधनाव्यभि
चारित्वाभावादत आह तेषामिति तथा च साध्यं यावताम् व्यभिचारितेषाम् व्यभिचारित्वंफ
लितार्थः दूषितमित्यत्र मणिकृता हेतुपन्यासात् स्वयं तमाह केवलेति नन्वेवम
व्याप्तिमन्यादेवसाध्याव्यभिचारित्वस्यपरित्यागेपुनर्लक्षणेवाधकाभाव इत्यत आह
साध्येति प्रमेयत्वादिसाध्यपक्षाव्यभिचारितादर्शनप्रसिध्याप्रकृतलक्षणोपिकेवलान्वय्य
व्याप्तिरित्यर्थः वस्तुमात्रादोषान्नसंगमयितुं साध्याश्रयसमानाधिकरणयोः कात्स्न्र्य
स्यानभिधानेनतमूलत्वान्नततोसपाकर्तुंचकात्स्न्र्यस्याश्रयंवितर्कयति कात्स्न्र्यमित्यादिना

न॰शी॰ सकलपक्षसंबंधस्येति मूलमुपपादयितुमाशंकते विकल्प्यापत्ति आपाद्य इति साधनस्यैकैकस्य उ
७५ त्पर्थः। अथाशेषसाधनस्य प्रत्येकसमानाधिकरणवृत्तिसाध्यतावच्छेदकत्वस्य विव
क्षणान्नोक्तदोषदूषावकाशः साधनस्याशेषत्वं च प्रकृतसाधनवद्वृत्तियावद्धर्माणां तादृशया
74 वदधिकरणतावच्छेदकतानां वा प्रत्येकमपर्याप्तत्वं तच्चैकव्यक्तिसाधनस्थलेपि न दुर्घटं इत्यतः स्व
पं दूषणमाह यावत्सेति अथाशेषसाधनाधिकरणवृत्तिसाध्याधिकरणताकत्वं वोच्यमत
आह पृथिवीत्वादिसमवायावच्छिन्नस्यानधिकरणपृथिवीनिष्ठाभावप्रतियोगित्वरूपं पृ
थिवीनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपं वा पृथिवीत्वव्यापकत्वं तत्समवे
तस्य गगनादेरपीति पृथिवीत्वेन समानाधिकरणत्वाभावादिति व्याप्तिर्न स्यादतो गगनादि एम
र्थवृत्तिपेजातिपदं समवेतार्थकं द्रव्यत्वादिरूपापास्तादृशजातेः प्रत्येकहेतुतापामेकत्र। ७५

क्तिके तदभावादित्यनेनैव गतार्थत्वमतोऽनुगतरूपानुधावनं नचैवं पृथिवीसमवेतादित्यस्येव
सम्यक्त्वे व्यापकत्वप्रवेशावश्यथे उक्तिवाच्यं कृत्स्नसाधनैकाधिकरणाव्याप्तित्वप्रवेशे व्याप्ति-
व्याप्तिदानार्थं तदुपादानादिति भावः अत एवेति उक्तं तिव्याप्तेरेवेत्यर्थः नेतरः नन्वेवं कृत्स्न
साधनेषु साध्यसामानाधिकरण्यव्याप्तिरित्यर्थः पूर्वमेकव्याप्तिसाधनस्यैवोक्तत्वात्त-
त्रैवमशङ्कितत्वासंभवादन्यथा व्याचष्टे एकव्यक्तिसाध्यक इति वह्निमान् धूमादित्यादि
विषमव्याप्तेरेव संख्यानान्परिमाणादिसमव्याप्तेरप्यव्याप्तिसंभवात्मलस्य न्यूनताभंगार्थं
पूरयति समव्याप्तेऽपि चेति संख्यापरिमाणादाविति संख्यासाध्यकपरिमाणादावित्य-
र्थः तदभावादिति मूलस्य सकलसाध्यसंबंधाप्रसिद्धेरिति नार्थः सत्वप्रमेयत्वादावेव तात्पर्यो
लभ्यादतस्तस्यान्यमर्थं व्याकरोति एकत्रसाधन इत्यादिना हेतुविशिष्टस्य शेषसाध्यस्य

न्न॰ श्री॰ त्वैकाधिकरण्योपदर्शितावच्छिन्नाधिकरणंतादृशधर्मवत्त्वं विवक्षितमिति नोक्तदोषइत्यभिप्रायात
७५ स्वाह भावाश्चेतिसकलसाध्यसंबन्धस्यानुपपत्तेरुक्तत्र साध्यस्यैकाधिकरणत्रवेशेऽप्य
तिव्याप्त्यर्थं धूमवान्वन्हेरित्यादिकमुपेक्षितं स्वाशंकितयोस्तृतीयचतुर्थयोरर्थं परिष्क
75 त्य दूषणमाह तृतीयइत्यादिना अत्रैतयोरेकमात्रवृत्तिसाध्यके शाहवान् गगनत्वादि
त्यादौ तृतीयस्यैवाव्याप्तिर्न चतुर्थस्य साध्यसमानाधिकरणपावद्धर्मीणां तत्राप्यनपा
पादित्याशयेनोक्तं यथासंभवमिति वस्त्याद्यवावितिधूमस्यवन्हिमद्यः पिण्डावृत्तित्वे
नोभयत्रापि वन्हिमान्धूमादित्यत्राव्याप्तिरित्यर्थः अतिव्याप्तिश्चेति सत्तापांवन्य
धिकरणपावद्धृतित्वस्य वन्हिसमानाधिकरणपावद्धर्मसामानाधिकरणस्य च सत्वा एम
द्वन्हिमान्सत्त्वादित्यत्रातिव्याप्तिरित्यर्थः साधनाश्रयस्य कात्स्न्यैक्तोसाधनो श्रुपेपीवन्हिः ७५

संबंधो वाक्यार्थः स्यात् तत्र च संबंधो नाश्रितत्वं हेतुमात्रे ऽतिप्रसक्तेः नो सामानाधिक पि
रण्यं साधनाश्रयैः पर्वतादिभिः सामानाधिकरण्यस्य धूमे विरहाद् व्याप्तेर् उक्तमर्थं परिष्कारेणेति त
था चाश्रितसाध्यसामानाधिकरण्यमेव संबंधपदस्य परिष्कृतोऽर्थ इति भावः ननु पक्षधर्मावच्छिन्नत्वोप
पावतिसाध्यवत्त्वं तादृशधर्मवत्त्वं वाच्यमत आह एकमात्रेति द्रव्यत्वादित्यादौ साधनाश्रयस्य
पावत्ताभावाद् व्याप्तिरित्यर्थः उक्तक्रमेणासंगतेराह तथैवेति परिष्कारस्यैवैकमेवेत्यर्थः ननु सा
धनसमानाधिकरणयावद्धर्माणां प्रत्येकं सामानाधिकरण्यं निवेश्यम् अतो नाप्रसिद्धिमित्यत
आह तादृशानामिति साधनसमानाधिकरणानामित्यर्थः न कुत्रापीति तथा चैकसाध्यकस
द्धेतौ संभवेऽपि वह्निमान् धूमादित्यादाव् व्याप्तिरेव पर्वतीयादिवह्नेर्महानसीयधूमाद्यसमाना
धिकरणत्वादिति भावः न च साधनसमानाधिकरणयावद्धर्माणां प्रत्येकसमानाधिकरणवृत्तित्वसं

ज॰ शी॰ प्यतावच्छेदकस्यैव तत्त्वमित्युक्तदोषाप्रसङ्ग इति वाच्यं तथासति रूपत्वन्यूनवृत्तिजातिमद्भिन्नरूपव
९८ त्वादित्यादावव्याप्त्यापत्तेः। साध्यतावच्छेदकीभूतनीलत्वादिजातेस्तादृशरूपवद्धर्मसमानाधिकरण
76 वृत्तित्वाभावादिति भावः धूमादिसामानाधिकरण्यस्यापि प्रमेयत्वादिप्रकारेण वह्न्यादिसा
मानाधिकरण्यव्यापकत्वादित्यतो व्याप्तिघटकसामानाधिकरण्यत्वेनेति विवक्षितमिति साधनसमा
नाधिकरणाभावं ते धर्माः समानाधिकरण्यस्येति बुद्धिस्थतादृशधर्मताभावात्रयाणां सदस्य
व्यापकतायामेव पर्यवसानादिति भावः लघुतयेति सामानाधिकरण्यद्रूपप्रवेशलाघवेनेत्यर्थः
उदासीनतः सिद्धान्तलक्षणस्य स्वप्रतियोगिवैयधिकरण्यादिघटितत्वेन विपरीतगौरवाद
न्योन्याभावस्याव्याप्यवृत्तितया दुर्वचत्वाच्चेत्यत एव दीधितिकृद्भिरपि व्याप्तिग्रहोपाये समा ९८
नाधिकरणाभावं ते धर्माः प्रदर्श्य साध्यसमानाधिकरणात्तादृशसाध्यसमानाधिकरणमेव ७६

हेतु

व्याप्तिः स्वीकरिष्यत इति ध्येयं गगने न विनाभावस्य वृत्तिमन्मात्र एव सत्त्वाद् व्याप्तेः प्ररूपति सा
ध्यमिति विनाशब्दार्थस्याभाववत्त्वस्य द्रा ल्पिन भावान्वये प्रकृतासंगतिरतः सप्तमीमन्तर्भा
८ व्य तदर्थमाह साध्याभाववतीति भावप्रत्ययस्योत्पत्तिपरत्वे द्रव्यं गोत्वादित्यादावतिव्याप्तिरत आह
भावो वृत्तिरिति पूर्वस्य न जाविनाभावस्यान्वयेनाह तद्वृत्तिरहितत्व साध्याभाववद्वृत्तिभिन्नत्व
मेव प्रागुक्तं किंतु मितिनाभेद इति भावः ननु साध्याभाववद्वृत्तिर्हि तु तावच्छेदकसंबन्धेने
वक्तव्या तथा च ताविन द्रव्यत्वादित्यादावव्याप्तिः सामान्यादेः समवायेन वृत्तेरप्रसिद्धेरतः
कल्पान्तरमाह साध्येति नाभाव इति साध्याभाववत्त्वावच्छेदेनाभावस्यान्वयात् साध्याभा
वव्यापकीभूतो भावो लभ्यते अवच्छेदकत्वस्य व्यापकत्वे पर्यवसानात् प्राप्तवृत्तिनञा
च पुनस्तथाविधाभावस्यान्वया तादृशाभोवाभावत्वरूपं प्रतियोगित्वं प्राप्यत इति न व्याप्ति

ज॰ शी॰ चारिणा प्रतिप्रसंगशंकापीत्याशयेन फलितार्थमाह साध्याभाववृत्तिज्ञानादेर्घटादेर्विषयतासंबंध
७७ स्य व्याप्तित्वाभावादाह सामानाधिकरण्यमिति एकनिरूपितसामानाधिकरण्यस्यान्यदीयव्या
प्तित्वायोगादाह किंचिद्रूपेति तथा च वह्नेर्धूमसामानाधिकरण्यमेव वह्न्यत्वावच्छिन्नधूम
स्य व्याप्तिरिति भावः व्यापकसामानाधिकरण्यं व्याप्तिरिति सिद्धान्तिमतेपि व्यभिचारिसंबंधेप्य
उक्तरूपे व्याप्तित्वमस्तीत्याशयेनाह धूमादेरपीति तद्बोधादित्यन्तस्य व्यभिचारग्रहदशायामि
त्यादिरर्थ इत्याशयेन शंकते नचेति तद्रूपसंबंधमात्रबोधः तथा अनुमितिहेतुः शंकां निरस्यति
व्यभिचारतद्व्यतिरेकयोरिति तदानीमनुमित्यनुत्पादे सर्वजनसिद्धत्वं विवादग्रस्तमतस्त्वाह
हेतुत्वं तत्रेति हेतुत्वं तत्र व्यभिचारग्रहेप्यनुमित्युत्पादाच्चेत्यन्वयः ननु तद्धेतुकानुमितौ तद्धेतुगोचर राम
रव्यभिचारज्ञानस्याभावो हेतुर्वक्तव्य इत्यत आह तत्रैवरूपान्तरेणेति तथा च वह्निव्याप्यत्वरूपेण ७७

धूमे व्यभिचारग्रहेऽपि धूमत्वावच्छिन्ने हेतुकानुमितिर्न स्यादिति भावः ननु साध्यसमानाधिक
रणावृत्तितद्धर्मावच्छिन्नवत्ताज्ञानजन्यानुमितौ तद्धर्मावच्छिन्ने व्यभिचारज्ञानाभावो हेतुरस्त्व
त आह हेतुतावच्छेदकेति तथा च वह्निसमानाधिकरणावान्यवेतद्रव्यत्वादौ हेतुतावच्छेदक
धूमत्वाद्यग्रहादनुमितिर्न स्यादिति भावः ननु साध्यसमानाधिकरणावान्यसरूत्वादि
रूपत्तीयानुमितौ व्यभिचारज्ञानाभावस्य हेतुत्वेऽपि न क्षतिः पर्वते वह्निसमानाधिकरणो
वह्निव्यभिचारीति ज्ञाने तद्दशायां साध्यसमानाधिकरणवत्ताज्ञानेन्यानुमितिस्तद्दातादृशा
नुमितौ साध्यसमानाधिकरणत्वावच्छिन्नधर्मिकव्यभिचारज्ञानाभाव एव हेतुर्वक्तव्य इ
त्यत आह हविवदं ते चेति तथा च संदिग्धव्यभिचारकत्वात्सामानाधिकरण्यज्ञानेनानुमितिहेतु
रिति भावः ननु व्यापकसामानाधिकरण्यावगाहिज्ञानस्यानुमितिहेतुतावादिमते सामानाधि

ज. श्री. करणप्रज्ञाने निश्चितो व्यभिचारकमेवेति तन्मते तस्य हेतुत्वे बाधकाभाव इत्यत आह व्यभिचा
७८ रेति अव्यभिचारस्येति हेतुव्यापकत्वज्ञानस्य साध्यांशे प्रकारतावच्छेदकत्वं युक्तमित्यर्थः न
78 चममापि व्यभिचारज्ञानाभावसहितसहचारज्ञानत्वेन हेतुत्वे व्यभिचारज्ञानाभावोऽव
च्छेदक एवेति वाच्यं तथापि ज्ञानस्य हेत्वाग्रवेशेनावच्छेदकगौरवात् विनिगमकाभावे
न सहचारज्ञानसाहित व्यभिचारज्ञानाभावत्वेनापि हेतुतापत्तेश्चेति भावं गौरवमिति प
स्व र्यवसितव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिधीविशिष्टहेतुवैशिष्ट्यावगाहिनिश्चय
स्यैवानुमितिहेतुत्वाद्व्यभिचारसंशयदशायां च विशेषणतावच्छेदकाभूतव्याप्यत्वप्रका
रकनिश्चयाभावात् कारणाभावे तत्राप्यविशिष्टवैशिष्ट्यावगाहिनिर्णयानुत्पत्त्यैवानु एम
मित्यनुत्पादसंभवाद् व्यभिचारांशे निश्चयत्वं नापेक्षितं तथापि विशेष्ये विशेषणमिति ७८

त्निष्पाये न परामर्शादिष्यनुमितिर्जायत इति प्राचीनमतेनेदं अन्यथा धूमव्यापकतावच्छेदकेन तद्
त्येन वा वह्नित्वेनावच्छिन्नवह्निसमानाधिकरणधूमवानयं पर्वत इत्यादिज्ञानादप्यनुमित्याप
त्तेः तत्वाव्यभिचारनिश्चयत्वस्य प्रवेशे पितृ ह्रिति गुरुतरैकरूपेणाहेतुत्वमेवोचितं व्यभि
चारज्ञानसहचारज्ञानयोः कारणताद्रूपकत्वस्य नामपेस्यलाघवादितिवाच्यं अव्यभिचार
निश्चयत्वघटकद्रूपस्य विशेष्यविशेषणभावभेदेन कार्यकारणभावद्रूपस्य तत्वाव्याव
वश्यकत्वादिति भावः तवैवेति व्यभिचारज्ञानस्याप्रामाण्यं व्यभिचाराभाववद्विशेष्यकव्यभि
चारप्रकारकत्वं तथा च तन्निश्चयत्वघटकस्य तदभावाप्रकारकत्वस्याव्यभिचारनिश्चय
त्वघटकव्यभिचाराप्रकारकत्वापेक्षया गुरुत्वान्न भ्रमत्वनिश्चयानास्कन्दित व्यभिचारज्ञा
नाभाववत्वेन हेतुत्वं किंतु भ्रमत्वज्ञानानास्कन्दितव्यभिचारनिश्चयत्वेनैवेत्यर्थः नव्यभि

जा.श्री. चारज्ञानांतरं भ्रमत्व इति निश्चयेपि व्यभिचारसंदेहदशायामनुमित्यनुत्पादात् भ्रमत्वनिश्चय
७९ विशेषणतामेवतत्तद्व्यक्तित्वेनोत्तेजकत्वमिति भ्रमत्वनिश्चयत्वेनाप्रवेशात्कुतो गौरवमि
७९ ति वाच्यं व्यभिचारज्ञानत्वावच्छेदेन भ्रमत्वनिरूपणानां तादृशभ्रमत्वनिश्चयत्वेनाननुगतरू
पेणोपनिविष्टत्वात् तथाविधानंतनिरूपणानां तत्तद्व्यक्तित्वेनाभावकूटस्योत्तेजकत्वे गौरवात् द्य
म पदित्वव्यभिचारस्य ज्ञानसामान्यं प्रमेति ज्ञानसत्त्वेपीदं ज्ञानं व्यभिचारविषयकं नवेदं ज्ञा
त्व नं प्रमेत्यसंवादगृहीतस्य व्यभिचारज्ञानस्योत्तरमनुमित्यनुत्पादाद्व्यभिचारज्ञानत्वावच्छेदे
नाप्रामाण्यज्ञानस्यैनाननुगतरूपेणोत्तेजकत्वं किंतु विशेषणतयैवेति विभाव्यते तदापि तद त
प्रामाण्यज्ञानाभावविशिष्टव्यभिचारज्ञानाभावत्वेन हेतुतायां तत्तदप्रामाण्यज्ञानाभावव्य एम
क्तीनां विशेष्यविशेषणभावभेदेन गुरुतरानंतकार्यकारणभावापत्तिः अव्यभिचारनि ७९

अपत्वेनैव हेतुत्वे तु तद्धर्मिकाग्रामारोपज्ञानानां तत्तद्व्यक्तित्वावच्छिन्नाभावत्वेनास्वातंत्र्येण
प्यनुमितिहेतुतापत्तेः अवच्छेदकगौरवासंभवात् न च तत्तद्ग्रामारोपनिश्चयानास्कंदितय
भिचारज्ञानत्वावच्छिन्नप्रतियोगिताकत्वेन उपलक्षितस्याखंडाभावस्य तत्तद्व्यक्तित्वेनैवानु
तृ मितिहेतुत्वं गौरवानवकाशादिति वाच्यं विशिष्टाभावस्य विशेष्यांशे विषयतात्रत्येकाभावा
नतिरेकेणोभयसाधारणस्य तद्व्यक्तित्वस्य असंभवात् अस्तु वा विशिष्टाभावोऽतिरिक्तः
तथापि प्रतियोग्यविशेषितस्यापि तस्य तद्व्यक्तित्वेन हेतुत्वे घटादिज्ञानविशेषणकप्रत्ये
कस्य तादृशव्यभिचारज्ञानस्य अन्यतरत्वावच्छिन्नप्रतियोगिताकत्वेनोपलक्षितानाम
प्यखंडाभावानां तत्तद्व्यक्तित्वेनानुमितिहेतुतापत्तेः । किंचैवं सामानाधिकरण्यधारमानु
मितिहेतुर्न स्यात् तादात्म्य निपघद्रुमादर्शायां नानुमितिस्तत्कालावच्छिन्नतावद्रुणा

ज॰शी॰ न्यतमत्वावच्छिन्नाभावस्याखंडस्यैव तद्व्यक्तित्वेन हेतुतायामतिप्रसंगाभावात् तस्मादखंड
८० तत्तदभावत्वेन हेतुतायामवश्यमन्यथासिद्धत्वं स्यात् कार्यं एतेन कार्यांतरे प्यखंडाभावो व्या ।
80 ख्यातः किंच व्यभिचारधियोऽनुमितिविरोधित्वे व्यभिचारव्याप्यानां व्यभिचारावच्छेदकानां
चानंतधर्माणां तद्रूपेण ज्ञानाभावा अप्यनंता अनुमितिहेतवो वाच्याः तत्सत्वेप्यनुमि
त्यनुत्पत्तेरित्यपि कुगौरवं अस्माकं तु हेतौ व्यभिचारव्याप्यवत्त्वादिग्रहदशायां व्याप्तेर्नि
र्णयविलंबादेवानुमितिविलंबः एतेन व्याप्तिनिर्णायिस्य हेतुत्वे तद्धर्मिकाणां नानाविध
भ्रमत्वज्ञानानामभावा अप्यनुमितिहेतवो वाच्या इति लाघवात् अंतर्विनानिश्चीयमान म
व्यभिचारज्ञानाभाव एक एवानुमितिहेतुरस्त्विति परास्तं तथापि व्यभिचारावच्छेदकतात्तद्ध राम
र्मवत्ताज्ञानाभावानां अनंतहेतुत्वस्यावश्यकत्वादिति संक्षेपः नानाविधेति साध्यनिष्ठ ८७

हेतुत्वव्यापकत्वसाधननिष्ठसाध्याभाववद्वृत्तित्वादिरूपेत्यर्थः आद्य इत्यस्वरसबीजं
तु पादृशव्यभिचारज्ञाने हेतुत्वस्य वाच्यं तेन तद्दूरोपि नो लघुतरस्यैव व्यभिचारस्य ज्ञाना
सखे भावो मयापि हेतुर्वाच्यः लघुव्याप्तिज्ञाने व्यभिचारान्तरज्ञानदशायामनुमित्युत्पत्तेस्त्व
यापि स्वीकारादित्यादिकं द्रष्टव्यं ननु साध्यसामानाधिकरण्यापलक्षितं हेतुमत्वज्ञा
नेनानुमितिहेतुः किंतु पक्षे तद्विशिष्टहेतुमत्वनिश्चयएव तत्र चेति तादृशज्ञानसत्वेऽव्य
भिचारज्ञानदशायामप्यनुमित्यंगीकाराद्व्यभिचारज्ञानाभावो न हेतुर्वाच्यः कुतो गौ
रवं दत्तमित्यत आह सामानाधिकरण्येति साध्यग्रहं विनेति पर्वते वह्निमत्वसंदेहदशा
यां वह्निमद्वृत्तित्वविशिष्टधूमवान्पर्वत इत्याकारकज्ञानानुत्पत्त्यातद्धर्मिकतत्सामानाधि
करण्यविशिष्टवत्ताबुद्धिं प्रति तद्धर्मिकतद्वत्तानिश्चयत्वेनैव हेतुत्वस्यावश्यकत्वादिति भावः

न-टी- दुर्ग्रहमितितथाचतदर्थंपक्षेसाध्यनिश्चयघोष्येविनानुमित्सामनुमितिःकुत्रापिनस्यादिति
८१ भावः ननुसाध्यवत्सामान्यभिन्नावृत्तित्वविवक्षणेमूलोक्तदोषाभावात्केषांचिन्मतेनसंपसि
द्धान्तमाह केवलेति सामानाधिकरण्यमात्रेति मात्रपदेनव्यभिचारग्रहनैरपेक्ष्यमुक्त
४। तद्ग्रहोपिकेवलान्वयित्वग्रहोपि तस्य केवलान्वयित्वंच अप्रतियोगित्वादिकमित्यादि
पदेनतादृशाप्रतियोगितानवच्छेदकधर्मवत्वादेस्संग्रहः कपिसंयोगाद्यभावस्यकेवला
न्वयित्वार्थंवृत्तिमदत्यन्ताभावस्यव्याप्यवृत्तित्वेनविशेषणीयतयातदप्रवेशेनलाघवादाह
अन्योन्येति अर्थमभिप्रेत्याहसाधनेवतद्वृत्तिवृत्तेर्विशेषणत्वमुचितमित्यन्वयः अ
समभिप्रेत्याह वृत्तित्वस्यवेति साधनवद्वृत्तित्वस्येत्यर्थः अन्योन्याभावस्यविशेषण राम
त्वमुचितमित्यन्वयः तथाचसाधनाश्रयवृत्त्यत्यन्ताभावाप्रतियोगित्वेसाधनवद्वृ ८१

न·टी सन्योन्याभावप्रतियोगितानवच्छेदकत्वेवासाध्येनिवेश्येकविधैवकेवलान्वयिव्यतिरेकि
८२ साधारणीव्याप्तिरनुमितिप्रयोजिकास्तुकेवलान्वयित्वसाध्यवदन्यावृत्तित्वयोरुभयोः
सत्त्वेपिरूपलाघवादितिभावः ननूक्तव्याप्तेः साधनभेदेननानात्वादेकसाध्यकानुमिति
68 स्थलेऽपितज्ज्ञानस्यानेककार्यकारणभावइतिलाघवात् केवलान्वयिसाध्यसंबंधः सा
ध्यवदन्यावृत्तित्वंवाव्याप्तिरनुमितौहेतुरस्त्वित्यतआह शेषमितिकेवलान्वयित्वाग्रहेपिअनु
मितेरानुभविकत्वात्तज्ज्ञानेनहेतुंकिंतुसाध्यवदन्यावृत्तित्वज्ञानमेवसाधनभेदप्यभेदादिनार
दिकमित्यर्थः

पत्रे ८२

स्तो

१०९५०